National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(48): 189-192
© 2023 NJHSR
www.sanskritarticle.com

**डॉ. मोरा श्रीधरः**
संस्कृतिविभागः,
उस्मानिया विश्वविद्यालयः,
हेदराबाद

Correspondence:
**डॉ. मोरा श्रीधरः**
संस्कृतिविभागः,
उस्मानिया विश्वविद्यालयः,
हेदराबाद

# ज्ञानविषये विद्यार्थिनां भगवद्गीतायाः प्रयोजनम्

**डॉ. मोरा श्रीधरः**

**अवतारिका –**

ज्ञानं परब्रह्मणो लक्षणमिति तैत्तिरीयोपनिषद्वदति।

**'सत्यं ज्ञानमनन्तं ब्रह्म ।'**[1] (तैत्तिरीयोपनिषत् - 1-1)

ज्ञानं नाम किमिति प्रश्नस्य समाधानं (उत्तरं) भगवद्गीतायां सम्यक्कथितम्। आध्यात्मिकज्ञानं, तत्त्वज्ञानस्य प्रतिपाद्यविषयः भगवानिति ज्ञानं च ज्ञानमित्युच्यते।

**'अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।**
**एतद् ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा।।'**[2] (भगवद्गीता - 13-12)

तादृशं ज्ञानं मानवाजीवने अतीव प्रधानं भवति। ज्ञानेनैव नरः स्वजीवनलक्ष्यं प्राप्तुं शक्नोति। ज्ञानेन विना मनुष्यः पशुतुल्यः एव भवति। अज्ञानिनः जीवनशैली परेषां हानिकरी भवति, स्वजीवनमपि नाशयति च। ज्ञानमाप्तुं बहवो मार्गस्सन्ति। तेषु ग्रन्थबोधाऽन्यतमा भवति। नैके ग्रन्थाः पठनश्रवणादिभिः ज्ञानं ददति । तादृशग्रन्थेषु भगवद्गीता नाम ग्रन्थोऽन्यतमः।

**भगवद्गीता** - यो ग्रन्थः लक्ष्यसाधनाय उपकरोति स एव ग्रन्थः सार्वकालीनः, सार्वजनीनश्च भवति। एतद्दृष्ट्या परिशीलयते चेत् भगवद्गीतैव सर्वोन्नतस्थानमधितिष्ठति। भगवद्गीता सकलमानवालेः सर्वार्थसिद्धेः परम- लक्ष्यप्राप्तेश्च सर्वोत्कृष्टसाधनं भवति।[3] कश्चन वैदेशिकः भगवद्गीतायाः वैशिष्ट्यमेवमवादीत्-

'The Gita can be seen as the main literary support for the great religious civilization of India, the oldest surviving culture in the world!'

(Thomas merton-catholic theologian, monk)

गीतामाहात्म्यमन्यैः एवमुपवर्णितम् -

**'गीता सुगीता कर्तव्या किमन्यैः शास्त्र विस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृता ॥'**[4]

**विद्यार्थी** - मनुष्यजीवने बाल्यं, यौवनं वार्धक्यमिति तिस्रः प्रधानदशास्सन्ति। तत्तद्दशासु आचरणीयान् विषयान् धर्मशास्त्राणि उपदिशन्ति। रघुवंशमहाकाव्ये विषयममुं कालिदासः एवमवादीत्।

**'शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**
**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥'**[5] (रघुवंशः -1-8)

पूर्वोक्तश्लोकानुसारेण बाल्ये विद्याभ्यासं कुर्यात्। येन विद्या अर्थ्यते सः विद्यार्थी इत्युच्यते। विद्या + अर्थी = विद्यार्थी। विद्यार्थिलक्षणानि नीतिग्रन्थाः सम्यगुपदिशन्ति। विद्यार्थी सच्छीलो भूत्वा

ग्रहणशक्तियुक्तो भवेत्। सत्पात्राय कृतं विद्यादानमतीव महत् इति सनातनधर्मो वदति। अतिश्रेष्ठेषु त्रिविधदानेषु विद्यादानमन्यतमममिति मनुस्मृतिः बोधयति। तादृशविद्यादानग्रहीता विद्यार्थी विद्याभ्यास-काले ब्रह्मचर्यमवलम्बेत । सः विद्याभ्यासं व्रतं तपश्चेति चिन्तयेत्। सः **'मह्यं विद्यां बोधयतु'** इति सविनयं गुरुं प्रार्थयेत।[6] विद्यार्थी आरोग्यवान् भवेत्। कुमारसम्भवमहाकाव्येऽपि आरोग्यस्य प्राधान्यमुक्तम् ।

**'शरीरमाद्यं खलु धर्मसाधनम् ।'**[7] (कुमारसम्भवम् - 5-33)

आरोग्यवानेव सत्कर्माणि कर्तुं शक्नोति। विद्यार्थी विनयेन शरद्धाभक्तिभ्यां च विद्याभ्यासं कुर्यात्। गुरुरपि विद्यार्थिनं न तर्जयेत्, न च भर्त्सयेत्। गौतमधर्मशास्त्रानुसारेण गुरुः विद्यार्थिनं न ताडयेत्।[8] विद्यार्थिनः गुरुभक्तिरावश्यकी भवति। उत्तररामचरिते भवभूतिः उत्तमविद्यार्थिनं एवं वर्णयति ।

**'वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे**
**न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।**
**भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा**
**प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः ॥'**[9]

(उत्तररामचरितम् - 2-4)

अधमस्थितेर्वा वर्तमानस्थितेः उत्तमस्थितिप्राप्तिरेव विद्यार्थिनः लक्ष्यं भवति ।

**'विद्या ददाति विनयं विनयाद्याति पात्रताम् ।**
**पात्रत्वाद्धनमाप्नोति धनाधर्मं ततस्सुखम् ॥'**

इति श्लोकप्रयोजनं विद्यार्थी लभेत। तदर्थं भगवद्गीताऽतीव प्रयोजनकरी भवति।

**ज्ञानविषये विद्यार्थिनां भगवद्गीतायाः प्रयोजनम्** - विद्यार्थिनां मानसिकदौर्बल्यं विद्यते । ज्ञानराहित्यमेवास्य कारणं भवति । अतो विद्यार्थिनां कृते भगवद्गीता एवं बोधयति। 'मानसिक दौर्बल्यं त्यक्त्वा कर्तव्योन्मुखो भव**'** इति ।

**'क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते ।**
**क्षुद्रं हृदयदौर्बल्यं व्यक्त्वोत्तिष्ठ परन्तप ॥'**[10]

(भगवद्गीता - 2-3)

पूर्वोक्तबोधा विद्यार्थिनाम् अतीव प्रयोजनकरी भवति। विद्यार्थिनः अज्ञानहेतोः परीक्षासमये हृदयदौर्बल्यं प्राप्नुवन्ति। तदा भगवद्गीतोक्तप्रकारेण मानसिकदौर्बल्यं त्यक्त्वा सम्यक् पठेयुः।

विद्यार्थिनः **'अहं इदं कर्म करिष्यामि, जेष्यामि वा न वा?'** इति चिन्तामाप्नुवन्ति । तेभ्यः भगवद्गीता एवमुपदिशति**- 'सुखदुःखे समे इति मत्वा कर्तव्योन्मुखो भव'**इति ।

**'सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।**
**ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।।**[11]

(भगवदीता - 2-38)

विद्यार्थिनः पूर्वोक्तबोधामाचरन्ति चेत् जयविषये चिन्ताग्रस्ताः न भवन्ति। परीक्षास्वपि जयविषये चिन्तां विहाय सम्यक् पठन्ति लिखन्ति च ।

प्रायः विद्यार्थिनः निर्णयं स्वीकर्तुं न शक्नुवन्ति। ते एकं निर्णय निश्चित्य तं व्यक्त्वा अन्यं निर्णयं स्वीकुर्वन्ति। निर्णयविषये तेषां स्थिरत्वं नास्ति । तेभ्यः भगवद्गीता 'स्थिरचित्तेन निर्णयं स्वीकुरू' इति बोधयति ।

**'व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।**
**बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥'**[12]

(भगवद्गीता-2-41)

विद्यार्थिनः उन्नतविद्यासमये 'का शाखा स्वीकर्तव्या' ? इति विषये एकं निर्णयं स्वीकृत्य तं त्यक्त्वा अन्यं निर्णयं स्वीकुर्वन्ति । अनेन ते सत्फलं प्राप्तुं न शक्नुवन्ति । अतः ते पूर्वे क्तिबोधामाचरन्ति चेत् अवश्यं सिद्धिमाप्तुं शक्नुवन्ति ।

अज्ञानेन विद्यार्थिनः कर्तव्यविषये कर्तव्यस्य कर्मणः समालोचनं त्यक्त्वा फलं प्रति चिन्तयन्ति । 'विद्यार्थिनः स्वकर्तव्यमेवाचरेयुः न तु फलं प्रति चिन्तां कुर्युः' इति भगद्गीता विद्यार्थिभ्यो बोधयति । एषा बोधा भगवद्गीतायां अतीव प्रधाना भवति ।

**'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**
**मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ।।'**[13]

(भगवद्गीता-2-47)

विद्यार्थिनः स्वजीवने बहूनि कर्माणि आचरेयुः। तदा ते कर्तव्यकर्मणां विषयमेव चिन्तयेयुः, न फलम्। ते पूर्वोक्तबोधामाचरन्ति चेत् अनेककर्माणि निश्चिन्तया कर्तुं शक्नुवन्ति । फलासक्ताः भवन्ति चेत् सामर्थ्यं नश्यति। अतस्ते फलविषये चिन्तां विहाय कर्माणि कुर्युः। फलं भगवान् ददाति । एवं कुर्वन्ति चेद्वियार्थिनः सफलाः भवन्ति ।

'विद्यार्थिनः सहनं विद्येत' इति भगवद्गीता बोधयति । यः शीतोष्ण-सुखदुःखादिद्वन्द्वं सहते सः विषयैराकर्षितः न भवति ।

**'मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत।।**[14]
**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥**[15]

(भगवद्गीता - द्वितीयोऽध्यायः)

यदि विद्यार्थिनः पूर्वोक्तबोधामनुसरन्ति तर्हि ते विद्यार्थिदशायां आगतान् सर्वान् संकटान् सहन्ते । ततः सत्फलं लभन्ते ।

विद्यार्थिनः प्रयत्नविषये फलितमाकांक्ष्य कर्मणि सन्नद्धाः भवन्ति । एतन्नोचितमिति भगवद्गीता कथयति - **'सिद्धेः असिद्धेश्च समत्वदृष्टिः योगः इत्युच्यते । योगस्थो भूत्वा सङ्गं त्यक्त्वा कर्माणि कुर्यात्'** इति

भगवद्गिता ता बोधयति-

**'योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।**

**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥'**[16]

(भगवद्गीता-2-48)

केचन विद्यार्थिनः परीक्षासु अनुत्तीर्णाः भवन्ति चेत् (आत्महननं) आत्मत्यागं कर्तुं यतन्ते। तेभ्यः पूर्वोक्तबोधाऽतीव प्रयोजनकरी भवति।

कर्माणि नैषुण्येन क्रियन्ते चेत् सः योगः इति कथ्यते। कर्माणि नैपुण्येन, फलापेक्षराहित्येन च कुर्यादिति विद्यार्थिभ्यः भगवद्गीता उपदिशति ।

**'बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।**

**तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥'**[17]

(भगवद्गीता-2-50)

पूर्वोक्तं उपदेशमनुसृत्य विद्यार्थिनः नैपुण्येन फलापेक्षाराहित्येन च कर्माणि कुर्युः। ततस्ते सत्फलं लभन्ते ।

विद्यार्थिनः अज्ञानेन मद्यपानीयादिव्यसनैः पीड्यन्ते। तेभ्यः भगवद्गीता एवमुपदिशति। 'यथा कूर्मः स्वाङ्गानि अन्तः मुकुलितानि करोति तथा विद्यार्थी अपि विषयेभ्यः इन्द्रियाणि आकृष्य अन्तः आकर्षितानि कुर्यात् -

**'यदा संहरते चायं कूर्मोङ्गानीव सर्वशः ।**

**इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता।।'**[18]

(भगवद्गीता-2-58)

पूर्वोक्तबोधामनुसृत्य विद्यार्थिनः मद्यपानीयादिव्यसनैः अनाकृष्टाः भवेयुः।

सर्वेषामपि मनः क्षणमपि अकर्मकृत् न तिष्ठति । अतः मनः सत्कर्मसु निमग्नं कुर्यादिति भगवद्गीता बोधयति ।

**'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।'**[19] (भगवद्गीता-3-5)

मानवजीवने अतीव प्रधानविषयः किमितिचेत् यदृच्छालाभ-सन्तृप्तिरेव। अमुमेव विषयं भजगोविन्दस्तोत्रे शङ्कराचार्यः एवं वदति – **'निजकर्मोपात्तेन लब्धेन धनेन सन्तुष्टो भव'** इति।[20]

**'यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम्॥'**

(भजगोविन्दस्तोत्रम् - 2)

भगवद्गीताऽपि अमुमेव विषयं एवं बोधयति - **'प्राप्तेन वस्तुना सन्तुष्टो भव'** इति ।

**'यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।**

**समस्सिद्धावसिद्धौ च कृत्वापि न निबध्यते ।।'** [21]

(भगवद्गीता-4-22)

पूर्वोक्तबोधामनुसृत्य विद्यार्थिनः परीक्षासु प्राप्तफलेन सन्तुष्टाः भवेयुः । ते विमत्सराः भूत्वा गुरुभक्त्या, सहविद्यार्थिभिः प्रेम्णा च वर्तेरन् । ततः विद्यार्थिनः विफलसमयेषु प्राणत्यागं न कुर्वन्ति ।

सर्वे समानत्वमभिलषन्ति। ईशावास्योपनिषदपि समानत्वं बोधयति। यः आत्मनि सर्वभूतानि, सर्वभूतेषु आत्मानं च पश्यति सः शोकं नाप्नोति ।

**'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।**

**तत्र को मोहः कश्शोक एकत्वमनुपश्यतः ।।'**[22]

( ईशावास्योपनिषत्-7)

भगवद्गीतापि अमुं भावमेवमुपदिशति-

**'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**

**शुनि चैव श्वपाके च पण्डितास्समदर्शिनः।।'**[23] (5-18)

**'सुहन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।**

**साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥'**[24](6-9)

(भगवद्गीता)

पूर्वोक्तबोधानुसारेण विद्यार्थिनः सर्वसमानत्वं प्रदर्शयेयुः ।

**उपसंहारः**

प्रायः विद्यार्थिनः अज्ञानहेतोः सव्यमार्गे न गच्छन्ति । अतः तेभ्यः ज्ञानविषये पूर्वोक्तप्रकारेण भगवद्गीता अतीव प्रयोजनकरी भवति ।

**<u>आधारग्रन्थसूची</u>**


1. तैत्तिरीयोपनिषत्तु- व्याख्यात - स्वामी ज्ञानदानन्द रामकृष्णमठम् – हैदराबाद-2010
2. BHAGAVAD GITA (as it is) – His Divine grace A.C. Bhakti - vedanta Swami Prabhupada. The Bhaktivedanta Book Trust-mumbai 45 th print - 2019 (ISBN: 978-93-84564-19-3
3. श्रीमद्भगवद्गीत(तत्त्वविवेचनी)- व्याख्यात- जयदयाल गोयन्दका गीताप्रेस गोरखपुर Dr. एम्. कृष्णमाचार्यलु, Dr. गोलि वेंकटरामय्य -26Th Print -2014
4. श्रीमद्भगवद्गीत - अनुवादकुलु - Dr.M. कृष्णमाचार्युलु Dr. गोलि वेंकटरामय्य, 59th print - 2021, गीताप्रेस गोरखपुर
5. रघुवंशमहाकाव्यमु - व्याख्यात - गोल्लापिन्नि सदाशिवशास्त्री (ज्ञानश्री आर्षविद्यागुरुकुलम्) एमेस्को बुक्स्-हैदराबाद – 4th print - 2021. ISBN : 978-93-86212-73-3)
6. सनातनधर्मम् - अनुवादकः - पिंगलि सूर्यसुंदरम्, जनचैतन्य आध्यात्मिक केन्द्र - हैदराबादु 4th print - 2019.
7. कुमारसम्भवम् - भाष्यकारः- श्री. पं. प्रद्युम्नपाण्डेयः, चौखम्बा विद्याभवन - वाराणसी - पुनर्मुद्रित - 2019.
8. उत्तररामचरितम् — व्याख्याकारः - डॉ. रमाकान्त त्रिपाठी चौखम्बा सुरभारती प्रकाशन - वाराणसी ISBN: 978-93-81484-64-7
9. भजगोविन्द - दक्षिणामूर्ति - ललिताष्टोत्तरशतानि व्याख्याता – यल्लंराजु श्रीनिवासरायः काणिपाकम् पब्लिकेषन्स् - विजयवाड - 2005.

10. ईशावास्योपनिषत्तु - व्याख्यात - स्वामि ज्ञानदानन्द - रामकृष्ण मठम् – हैदराबाद् 10 th print - 2020 (ISBN: 978-93-83142-61-3)

**पदान्तसूची**

[1]तैत्तिरीयोपनिषतु पृष्ठसंख्या - 62.

[2]Bhagavadgita (as it is) - पृष्ठसंख्या - 566.

[3]श्रीमद्भगवद्गीता - पृष्ठसंख्या - मनवि- 1

[4]Bhagavad Gita (as if is) - पृष्ठसंख्या - I.

[5]श्रीमद्भगवद्गीत - पृष्ठसंख्या - 4

[6]रघुवंशमहाकाव्यम् - पृष्ठसंख्या - 14.

[7]सनातनधर्मम् - पृष्ठसंख्या - 181

[8]कुमारसम्भवम् - पृष्ठसंख्या - 131

[9]सनातनधर्मम् - पृष्ठसंख्या - 181.

[10] उत्तररामचरितम् - पृष्ठसंख्या-88

[11] Bhagavadgita (as it is) – 68

[12] तत्रैव - पृष्ठसंख्या - 108.

[13] तत्रैव - पृष्ठसंख्या - 113.

[14] तत्रैव - पृष्ठसंख्या - 119.

[15] तत्रैव - पृष्ठसंख्या – 82, 83.

[16] तत्रैव - पृष्ठसंख्या - 120.

[17] तत्रैव - पृष्ठसंख्या - 122.

[18] तत्रैव - पृष्ठसंख्या - 130

[19] तत्रैव – पृष्ठसंख्या -148

[20] भजगोविन्द दक्षिणामूर्ति-ललिताष्टोत्तरशतानि - पृष्ठसंख्या-8

[21] Bhagavad Gita (as it is) - पृष्ठसंख्या – 218

[22] ईशावास्योपनिषत्तु - पृष्ठसंख्या - 16

[23] Bhagavad Gita (as it is) - पृष्ठसंख्या - 256

[24] तत्रैव पृष्ठसंख्या - 277